# जयमङ्गलम्

मङ्गलम् आवर्त पुरवास दम्पति
सुन्दरि सुन्दरेशात्मजाया
मङ्गलम् वर पराशर गोत्र जाताय
प्रमादिषु धनुषि पुनर्वसु भवाय जयमङ्गलम्

सर्व शक्ति युताय सर्व सम भावाय
सर्वलोकैक हित साधकाय
साधु सद्गुरु वर्य रमणाय भगवते
पादसेवकाराम भावनाय जयमङ्गलम्

# श्री अरुणाचल पञ्चरत्नम्

करुणापूर्ण सुधाब्धे
कबलितघनविश्वरूप किरणाऽवल्या ॥
अरुणाचल परमात्मन्
अरुणोभव चित्तकञ्जसुविकासाय ॥ १

त्वय्यरुणाचल सर्वं
भूत्वा स्थित्वा प्रलीनमेतच्चित्रम् ॥
हृद्यहमित्यात्मतया
नृत्यसि भोस्ते वदन्ति हृदयं नाम ॥ २

अहमिति कुत आयाती
त्यन्विष्यान्तः प्रविष्टयाऽत्यमलधिया ॥
अवगम्य स्वं रूपम्
शाम्यत्यरुणाचल त्वयि नदीवाब्धौ ॥ ३

त्यक्त्वा विषयं बाह्यं
रुद्धप्राणेन रुद्धमनसाऽन्तस्त्वाम् ॥
ध्यायन्पश्यति योगी
दीधितिमरुणाचल त्वयि महीयं ते ॥ ४

त्वय्यर्पितमनसा त्वां
पश्यन्सर्वं तवाकृतितया सततम् ॥
भजतेऽनन्यप्रीत्या
स जयत्यरुणाचल त्वयि सुखे मग्नः ॥ ५

श्रीमद्रमणमहर्षेर्दर्शनमरुणाचलस्य देवगिरा ।
पञ्चकमार्यागीतौ रत्नं त्विदमौपनिषदं हि ॥

# भुजग भूषण

पल्लवि
भुजग भूषण उमा सहित परमेश्वरा
आरति - जय आरति

अनुपल्लवि
गजवदन स्कन्द कुमारा
वारिजनित सरला हारा

आरति - जय आरति

चरणम्
सेवक जनश्रित मन्दारा
भावित मुनिहृद् सञ्चारा
वेदनुत तेजो लिङ्गाकारा
भूरित्यादि मन्त्राधारा

श्री महावाक्यार्थ तत्वस्वरूपा
शिव महायोगानुभूति स्वरूपा
भव महारण्य अनलस्वरूपा
श्री शोणशैल स्थित वेद्यरूपा

आरति - जय आरति